श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वैनतेयाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वैनतेयाष्टोत्तरशतनामस्तोत्रम् ॥

श्री वैनतेयः पुण्यात्मा पक्षिराजः शुभङ्करः।
शर्माध्यक्षः खगाध्यक्षो ब्रह्मविद्याविशारदः ॥ 1 ॥

आहृतामरपीयूषः सुबाहुः सामगायनः।
गण्डशैलनिभः शूरः पक्षविक्षेपघातवान् ॥ 2 ॥

क्षोणीधरसमाकारः वैकुण्ठवशवर्तनः।
सदा वैकुण्ठचिन्तश्च सर्पघाती महाबलः ॥ 3 ॥

सुरासुरगणेड्यश्च हर्षकोलाहलान्वितः।
बृहत्पादो महावीरः पक्षिमल्लः शुभान्वितः ॥ 4 ॥

पतङ्गकुलरत्नं च नागेन्द्राभरणः शुचिः।
सुधाकुम्भधरस्साधुः सुपर्णो विष्णुवाहनः ॥ 5 ॥

अपमृत्युहरो दक्षो बृहत्पक्षः सुबुद्धिमान्।
कार्कोटहारः सुयशाः पक्षवेगजितानिलः ॥ 6 ॥

नीलाम्बरधरः स्रग्वी सर्वेशो भक्तवत्सलः।
वासुकि ब्रह्मसूत्रश्च तक्षेण कटिसूत्रवान् ॥ 7 ॥

वेद शास्त्रविचिन्त्यश्च ब्रह्माण्डव्यापकः परः।
दैत्यारिर्वज्रदंष्ट्रश्च सुधाकुम्भः सुहस्तकः ॥ 8 ॥

नागहन्ता साधुसेवी विश्वविख्यातकीर्तिमान्।
कान्ति सम्पूर्णदेहश्च शुक्लवस्त्रधरोऽमलः ॥ 9 ॥

त्रिवृत्सामशिरस्कश्च सत्वादिगुण संयुतः।
स्वस्ति दक्षिणपादश्च सुवर्णसदृशः पटुः॥ 10 ॥

दीर्घबाहूरक्तनेत्रः वक्रतुण्डो महाबलः।
अण्डजेन्द्रः पापनाशः नीलनासः सुदीप्तिमान्॥ 11 ॥

महादर्वीकराहारः सुचरित्रः सुखङ्करः।
वाहनेन्द्रश्चोत्तमाङ्गः द्वन्द्वयुद्ध विशारदः॥ 12 ॥

सर्वध्येयोऽव्याजबन्धुः पद्मदक्षिणकर्णकः।
शाकिनीडाकिनीहन्ता पिङ्गलाक्षो भयङ्करः॥ 13 ॥

नित्यतृप्तः सदातुष्टो दैत्यारातिरथो दृढः।
महाधीरो महाशूरो निःसहायो महाबली॥ 14 ॥

महापद्माख्यनागेन्द्रराजद्वामशुभश्रवाः।
वन्दितब्रह्मरुद्रादिविश्ववन्द्यो महामतिः॥ 15 ॥

फणीन्द्र कटकस्वामी विनतानन्दवर्धनः।
गरुत्मान् गरुडश्चण्डश्चाष्टनाग विभूषणः॥ 16 ॥

तटित्कान्तिसमानाभः मातृशोकविनाशनः।
कोटिसूर्यप्रतीकाशः कनकाचलसन्निभः॥ 17 ॥

सर्वभूतगणेड्यश्च सर्पाभरणभूषितः।
सकलक्ष्वेळनाशी च सर्वदोषनिवारकः।
विष्णु भक्तानुकम्पी च ऋग्यजुःसामविग्रहः॥ 18 ॥

इतीदं वैनतेयस्य नाम्नामष्टोत्तरं शतम्।
त्रिसन्ध्यं यः पठेन्नित्यं स सर्वाभीष्टमाप्नुयात्॥ 19 ॥

श्रीमता वैनतेयेन पुनरावर्तिवर्जितम्।
नीयते च परन्धाम योगिनामपि दुर्लभम्॥ 20॥

॥ इति श्री वैनतेयाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥